CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

कर्पूरस्तवः ।

पण्डितराजजगन्नाथविरचित-

दीपिकाख्यटीकासमेतः ।

प्रकाशकः

बाबू रघुवरसिंह बुकसेलर

सरस्वती पुस्तकालय,

मधुबनी, दरभंगा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकालप्रणीतः

श्रीमद्दक्षिणकालिकायाः

कर्पूरस्तवः ।

Acc No 45928

पण्डितराजरङ्गनाथविद्वद्विरचित-

दीपिकाख्यटीकासमेतः ।

काशिकराजकीयप्रधानसंस्कृतपाठशालायां ज्योतिषशास्त्राध्यापक-

ज्योतिषाचार्यझोपाभिधश्रीमुरलीधरशर्मणा संशोधितः ।

प्रकाशकः

बाबू रघुवरसिंह बुकसेलर

मधुवनी, दरभंगा ।

काश्यां

बी. एल. पावगी द्वारा

रामघट्टस्थ हितचिन्तक मुद्रणालये मुद्रापितः ।

संवत १९८६

मूल्यम् ४ आ०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूमिका ।

अस्ति खलु विदितमेव भवतां यदसौ महाकाल प्रोक्तस्य श्रीमद्दक्षिणाकालिकायाः स्तोत्रस्य कर्पूरस्तवाभिधस्य सविधिपठनेन पुरुषार्थचतुष्टयसम्पत्तिर्गद्यपद्यचमत्कारचातुरीविद्या लोकैः प्राप्यत इति तत्स्तोत्रादागमान्तरादपि जगति जागर्त्ति । तत्कथितानुष्ठानानुष्ठातृभिः कतिपयैः किं किं नासादितमिहानेकाः किंवदन्त्योऽपि सर्वत्र प्रसिद्धा एव ।

अथ तस्य गूढार्थगुम्फितस्य कर्पूरमहास्तोत्रस्यानेकाष्टीकास्तन्त्रशास्त्रमर्मभेदिभिर्भक्तैर्विरचिताः प्रायो मुद्रिता अप्युपलभ्यन्ते । किन्तु तत्सर्वासां टीकानामस्मद्दृष्टिगोचरीभूतानां श्रीमत्पण्डितराज*रङ्गनाथविद्वन्निर्मिता नानार्थदीपिनी कर्पूरस्तवदीपिकाख्या पाठान्तरार्थबोधिनी तत्प्राचीनटीकाकाराभिप्रायप्रकाशिनी सरला च शिरोमणित्वेनानुभूयप्राभाकरीकम्पन्यधिपतीनामाज्ञामधिगम्य तत्र परम्परालेखकानुगताशुद्धिं यथामति संशोध्य च मुद्रितेयमपरभ्रान्तिविप्लावकानां विदुषां मनोमोदमादधात्विति ।

सं १९६० मार्ग १५ ।

झोपाभिध-
श्रीमुरलीधरशर्मा ।

---

* अयं नेपालमहाराजाधिराज-श्रीपृराजेन्द्रविक्रमसाहदेवसमये सं० १८९३. बहुसम्मानितः प्रायः साक्षात् तन्महाराजाधिराजगुरुरेवेति टीकासमाप्तिलेखतो निश्चीयते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालीमाहात्म्यं भैरवीतन्त्रे ।



नात्र चित्ताविशुद्धिः स्यान्नारिमित्रादिदूषणम् ।
न वा प्रयासबाहुल्यं समयासमयादिकम् ॥
न वित्तव्ययबाहुल्यं कायक्लेशकरं न च ।
देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये ॥
पन्नगै राक्षसैर्मर्त्यैर्मुनिभिश्च मुमुक्षुभिः ।
कामिभिर्धर्मिभिश्चार्थमीप्सुभिः सेव्यते सदा ॥
य एनां चिन्तयेन्मन्त्री सर्वकामसमृद्धिदाम् ।
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ॥
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ॥
वह्नेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः ।
दिवारात्रिव्यत्ययं च कर्त्तुं भवति सक्षमः ॥
अन्ते च लभते देव्या गणत्वं दुर्लभं नरः ।
चन्द्रसूर्यसमो भूत्वा वसेत् कल्पायुतं दिवि ॥
न तस्य दुर्लभं किञ्चिद्यः स्मरेद्घोरकालिकाम् ॥

तन्त्रान्तरे ।

कलौ काली कलौ काली कलौ काली तु केवला ।
साधिता कालनाथेन प्रत्यक्षा कालिका कलौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कलौ कालीं विहायाथ यः कश्चिन्मोक्षकामुकः ।
स भोजनं विना नूनं क्षुन्निवृत्तिमभीप्सति ॥
कलौ कालीं विहायाथ यः कश्चिच्छान्तिमिच्छति।
स हि शीतनिवृत्त्यर्थं हिमशैलं निषेवते ॥
कलौ कालीं विहायाथ यः कश्चित् काव्यमिच्छति।
स तु दुःखनिवृत्त्यर्थं पापानि कुरुते सदा ॥
श्रीमहाकालिका विद्या कलौ पूर्णफलप्रदा ।
कलिर्हि यस्या दासस्य पादपूजां करोति हि ॥
अज्ञानाज्ज्ञानतो वाऽपि सलीलं वा सहेलया ।
स्मृताऽपि सिद्धिदा काली सकृदेव महेश्वरि ॥
महाविद्या सिद्धिविद्या विद्याभेदैः प्रतिष्ठिता ।
उपविद्यादिभेदैश्च कालिका संस्थिता भुवि ॥
ताराद्याः सकला विद्याः कालिकायां प्रजज्ञिरे ।
सर्वा विद्याः कालिकायां संस्थिता एव पार्वति[1]॥

१ अन्यद्विशेषार्थं पुरश्चर्यार्णवो द्रष्टव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ

कर्पूरस्तवः

पण्डितराजरङ्गनाथकृत-

दीपिकाख्यटीकासमेतः ।

गणेशमार्यां गोविन्दं गुरुं नत्वा समासतः ।
रङ्गनाथः प्रकुरुते कर्पूरस्तवदीपिकाम् ॥

इह खलु भगवान् महाकालो द्वाविंशत्यक्षरं महाविद्या माहात्म्यं प्रकटयिष्यन्नेतद्घटकावयवानामपि पृथक् मनुरूपतया वक्ष्यमाणप्रयोगसाधनक्षमत्वसूचनाभिन्नफलनिर्देशपूर्वकं यथाक्रमं तदवयवान् विशिष्टस्वरूपं च प्रकाशयन् स्तवमारभते ।

कर्पूरं मध्यमान्त्यस्वरपररहितं सेन्दु वामाक्षियुक्तं
बीजं ते मातरेतत् त्रिपुरहरवधु त्रिः कृतं ये जपन्ति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ।

कर्पूरम्-इत्यादि । तत्र प्रमाणादिकमन्यत्र विशेषेण निरूपितं विस्तरभिया त्यज्यते । ध्वान्तधाराधररुचि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुचिरे । ध्वान्तमिव तिमिरमिवातिनीलवर्णो यो धाराधरो मेघस्तस्य तयोर्वा रुचिः कान्तिस्तद्वद्रुचिरा शोभमाना रम्यगाढनीलवर्णेत्यर्थः । तत्सम्बोधनम् । अनेन मेघस्येव गद्यपद्यधारासम्पादकत्वजगत्सन्तापशामकत्वादिकं सूच्यते । मातर्जगज्जननि । अनेक निरुपाधिकरूपाश्रयतया सकलजगत्पालनकारणतत्परत्वं सूच्यते ।

'महाप्रलयमासाद्य कोटिब्रह्माण्डनायिका ।
शिवशक्तिमयं देहमेकीकृत्य सदा स्थिता ॥
विन्दुव्यापकरूपेण स्वरूपं विभ्रती परम् ।
एतस्मिन्नेव काले तु स्वबिम्बं पश्यती शिवा ॥
तद्बिम्बं तु भवेन्माया तत्र मानसिकं शिवम् ।
सृष्टेरुत्पादनार्थं तु भर्त्तृरूपमकल्पयत्' ॥

इत्यादिरुद्रयामलादिवाक्यैराद्यायाः सकलदेवादिकारणत्वादिदं न विरुध्यते । त्रिः कृतं त्रिरावृत्तम् । 'इदं क्रियाविशेषणम्' इति-अन्ये । कर्पूरं तत् पदं मध्यमान्त्यस्वरपररहितम्। मध्यम ऊकारः । अन्त्यश्चरमोऽकारः स्वरस्तद्भिन्नावशिष्टः ककाराकारः । पः पकारः । अकार उच्चारणार्थः । रः अकाराश्रितो रेफः । तै रहितं हीनम् । ककाररेफावावशिष्टौ । यद्वा मध्यो मध्यमः । मशब्दस्य ब्रह्मवाचकत्वेन तद्वाचकान्तरककारो लक्ष्यते । तस्याकारो मः । 'मशब्दस्यैव तादृशावयवे लक्षणा' इति-एके । अन्त्यश्चरमः । तादृशाश्च ते स्वराश्च । शेषं पूर्ववत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्वा मध्यमान्त्यपदाभ्यांपूर्व-शब्दयोर्ग्रहणम् । स्वरपदेन ककाराकारः।ते परे पृथक् कृता यस्मात् । तादृशंच तद्रहितं रेफसहितं रेफयुक्तमित्यर्थः । इत्याद्यलमधिकेन। पुनः सेन्दु वामाक्षियुक्तम् । सेन्दु बिन्दुसहितम् । वामाक्षि ईकारस्तेन युक्तं सहितम् । एतेन क्रीँ इति महाबीजमुद्धृतम् । एतत् पूर्वनिर्दिष्टरूपम् । तेन च बीजं कारणवत् प्रकाशकं शब्दविशेषं ये जना जपन्ति परिपाट्या आवर्त्तयन्ति । सर्वसिद्धि सकलैश्वर्यं गतानां प्राप्तानां तेषां जपतत्पराणां मुखकुहरात् तदास्यगर्त्तात् । कुहरत्वेनागम्यत्वादिबोधनद्वारा सरस्वतीप्रवाहशालित्वं सूच्यते । गद्यानि दण्डकरूपाणि । पद्यानि च श्लोकरूपाणि च । वाचो वाक्यानि । 'वाच इति षष्ठ्यन्तम् । तत्सम्बन्धीनि गद्यानि पद्यानि चेत्यन्वयः' इति-एके । स्वच्छन्दं यथेष्टमप्रतिहतं च । उल्लसत्येव प्रसरत्येव । एवं च बीजत्रयात्मकैतत्समाराधनतत्पराणामष्टसिद्धिलाभपूर्वकमहावागैश्वर्यप्राप्तिर्भवति किमु तद्विशिष्टमहाविद्याजापिनां वक्तव्यमिति भावः ॥ १ ॥

ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन्महोशि
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ।
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-
वृन्दं चन्द्रार्धचूडे प्रभवति स महाघोरशापावतंसे ॥२॥

आद्यबीजत्रयमुद्धृत्य तदुत्तरस्थकूर्चद्वयोद्धारमाह ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशान इति । चन्द्रार्धचूडे। चन्द्रार्धाऽर्धचन्द्रयुक्ता चूडा शिरोभागो यस्याः । 'चन्द्रार्धश्चूडायां यस्याः' इत्येके । तत्सम्बोधनम् ।

'अष्टमीशकलाकारचन्द्रालङ्कृतमस्तकाम्'-इति ।

कालीतन्त्रेऽभिधानात् । अनेन स्वभक्तजनस्य परमानन्दमनोध्वान्ताज्ञाननिवृत्त्यादिसामर्थ्यातिशयःसूच्यते। तथा महाघोरशावावतंसे । महाघोरा दैत्यादिभयजनकाः शावाः शवशिरः-प्रेतयादयः। अवतंसा भूषणानि यस्याः। पश्चात् कर्मधारयः । यद्वा । महाघोरौ शावौ शवरचितौ अवतंसौ कर्णभूषणे यस्याः । अनेन स्वभक्तानां कामक्रोधादिदोषनिवर्त्तकत्वं सूचितम् ।

तथा चोक्तं कालीतन्त्रे ।

'कामादी श्च रिपून् हत्वा शिरःकण्ठादिभूषणम् ।
कृत्वा सम्यक् स्थितां कालीं चिन्तयेद्ब्रह्मरूपिणीम्'
॥ इति ॥

महेशि परमैश्वर्यसंयुते सकलजगदीश्वरीति वाऽर्थः अन्यत् पूर्वोक्तापेक्षयाऽभिन्नं न तु तद्भिन्नमनेनाक्षेप्यमिति भावः । द्वन्द्वं द्विरावृत्तम् । ईशानो हकारः । सेन्दुवाम श्रवणपरिगतः । सेन्दु विन्दुयुक्तं वामश्रवणमूकारः । तेन परिगतो मिलितस्तेन हूँ इति बीजमुद्धृतम् । एतदात्मकं ते तव बीजम् । मन्दचेता मूढबुद्धिर्जनः प्राकृतो लोकः । कदाचित् कस्मिँश्चित् काले । अनेन जपे कालनियमाभावः सूच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदुक्तं पद्मपुराणेऽपि ।

सर्वदैव जपः कार्यो न दोषस्तत्र कश्चन-इति ।

एकं वारं सकृत् । सामान्यप्रयोगवद्यमाणनियमानपेक्षत्वेनापीति भावः । यदि जपति । तर्हीति शेषः । स जनो वाचामधीशं बृहस्पतिं विद्ययेति भावः । धनदमपि कुबेरमपि निध्यादिसम्पत्त्येति भावः । जित्वा अभिभूय न्यूनीकृत्येति यावत् । अम्बुजाक्षीवृन्दं कमलनेत्रोपमनायिकाकदम्बम् । मोहयन् सौन्दर्यविलासादिना स्वाधीनीकुर्वन् । चिरं बहुकालपर्यन्तं प्रभवति प्रभुर्भवति । एवं चैतत्कूर्वद्रूपात्मकस्वरूपजापी विद्यैश्वर्यसौन्दर्यादिपूर्णः समस्तजगतामीशो भवतीत्यादि पूर्ववद्भावः ॥ २ ॥

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजं ते द्वन्द्वमन्यद्विगलितचिकुरे कालिकेये जपन्ति ।
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमभितो वश्यभावं नयन्ति
सृक्कद्वन्द्वासृधाराद्वयधरवदने दक्षिणे कालिकेति ॥३॥

बीजपञ्चकमुद्धृत्य तदुत्तरस्थमायाद्वयोद्धारमाह । ईश इति । विगलितचिकुरे विकीर्णकेशकलापे अनेनानन्दमयत्वं सूच्यते । सृक्कद्वन्द्वासृधाराद्वयधरवदने । सृक्कद्वन्द्वे ओष्ठप्रान्तयुग्मे असृग्धाराद्वयं रुधिरप्रवाहयुगलं धरति बिभर्त्ति तादृशं वदनं यस्यास्तत्सम्बोधनम् । दक्षिणे सर्वदा सकलसाधकानुकूले कालिके श्यामरूपे । अन्यत् पूर्वातिरिक्तम् । द्वन्द्वं द्विरावृत्तम् । ईशो हकारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैश्वानरस्थो वह्न्यारूढो रेफस्थित इत्यर्थः । तथा शशधरविलसद्वामनेत्रेण । शशधरेण विन्दुना विलसत् शोभमानं युक्तमिति यावत् । यद्वामनेत्रमीकारस्तेन युक्तो विशिष्टः । अनेन ह्रीँ इति बीजमुद्धृतम् । एतद् भिन्नं ते बीजं कालिकेति देवतास्वरूपमिति भावनयेत्यर्थः मन्त्रदेवतयोरैक्यानुसन्धानस्य जपोत्कर्षहेतुत्वादिति भावः । 'अक्षरे च'-इति पाठान्तरे । च पुनः । अक्षरस्वरूपे इति सम्बोधनपदं बोध्यम् । ये जपन्ति ते द्वेष्टारं रिपुं घ्नन्ति नाशयन्ति । च पुनः । त्रिभुवनं त्रिलोकीमभितः सर्वतो मनोवाक्शरीरादिसाधारणयेनेत्यर्थः । वश्यभावं वश्यतां नयन्ति प्रापयन्ति । 'द्वेष्टारं ते दहन्ति त्रिभुवनमपि ते वश्यभावम्'-इति पाठान्तरेऽपि स्पष्टोऽर्थः । एवं चैतन्मायाद्वयात्मस्वरूपजापिनां निरवग्रहत्रिभुवनैश्वर्यलाभ इत्यादिपूर्ववद्भावः ॥ ३ ॥

ऊर्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं ततोऽधः
सव्येऽभीतिं वरं च त्रिजगदघहरे दक्षिणे कालिके च ।
जप्त्वैतन्नाम ये वा तव विमलतनुं भावयन्त्येतदम्ब
तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥ ४

बीजसप्तकमुद्धृत्य महाविद्याघटकस्वरूपान्तरमुद्धरति । ऊर्ध्वमू-इति । त्रिजगदघहरे । त्रयाणां जगतामघं पापं हरति सा तत्सम्बोधनम् । सकलजगत्पापहारिणीत्यर्थः । अनेन सकलजगत्सेव्यत्वं सूच्यते । प्रकटितरदने । प्रकाशितदंष्ट्रे । 'प्रकटितवदने' इति पाठे । असम्मी-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लितमुखे इत्यर्थः । अस्त्र जगन्मातः । ये वा ये च साधकाः । दक्षिणे कालिके च इत्यर्थे चकारो दक्षिणे कालिके इतीत्यर्थकः । ' एतन्निरुक्तस्वरूपं नामगुण प्रतिपादकप्रातिपदिकसंज्ञारूपं ' वा । जप्त्वा जपपरिपाट्या उच्चार्येत्यर्थः । 'सागरं तर्त्तुकामस्य' इत्यादिवदिडभावः । वामे वामभागस्थे । करकमलतले हस्तपद्मयुग्मतले । ऊर्ध्वमूर्ध्वभागे विद्यमानं कृपाणं करवालम् । ततोऽधस्तत्रैवाधोभागे विद्यमानम् । तत इत्यस्य तदनन्तरमित्यर्थः । 'सव्ये इत्यत्रान्वय' इति-एके । छिन्नमुण्डं गलद्रक्तधारशिरः । इदं च महामोहस्येति ज्ञेयम् ।

तदुक्तं रुद्रयामले ।

कालीरूपेण देवेशी महामोहशिरः स्वयम् ।
धारयन्ती सदा वामकरे च मेघसन्निभा-इति ॥

सव्ये दक्षिणे । 'सव्यं दक्षिणवामयोः'-इति विश्वः । करकमलतल इत्याद्यत्रानुसज्यते । तथा च । दत्तभागस्थ करपद्मतले ऊर्ध्वे अभीतिमभयम् । अधो वरं च । तदुभये मुद्राद्वयमित्यर्थः । एतत्पूर्वोक्तलक्षणम् । उद्देश्यानुरोधेन नपुंसकम् । तव विमलतनुमविद्याविकारशून्यकल्पितमूर्त्तिं भावयन्ति ध्यायन्ति तेषां जपध्यानतत्पराणां त्र्यम्बकस्य त्रिनेत्रस्य शिवस्य अष्टौ अणिमाद्याः सिद्धयो विभूतयः करस्था हस्तस्थिता इव वशगा भवन्तीति शेषः । यद्यपि जपध्यानयोः साहित्यमेव स्वारसिकमिति जप्त्वा भावयन्तीत्युक्तिः 'भुक्त्वा व्रजति'-इतिवदुत्तरकालिकत्वं बोधयति न सौरस्यमावहति तथाऽपि 'मुखं व्या-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दायं स्वपिति'-इतिवदुत्तरकालवृत्तित्वभावान्न दोषः । 'तव मनुविभवं भावयन्तस्तदर्थम्-इति पाठान्तरे । 'ऊर्ध्वम्'-इत्याद्युक्तरूपं तव मन्त्रसामर्थ्यम् । सारूप्यमुक्तिप्रदत्वादितिभावः । तदर्थं मन्त्रवाच्यार्थरूपं च भावयन्तो दक्षिणे कालिके इति नाम जप्त्वा स्थिता ये तेषामित्यादिस्थिताः । शब्दशेषपूरणेनान्वयादर्थसौरस्यं ज्ञेयम् । 'ततोऽधः' इत्यत्र 'दधानाम्'-इति पाठान्तरे । तनुविशेषगता स्पष्टा । तदनेन सम्बोधनान्तनानाभेदैश्च सूचितं ध्येयं स्वरूपं तन्त्रान्तरेऽपि बहुशोनिरूपितम् ।

तथा च कालीतन्त्रे ।

'करालवदनां घोरां मुक्तकेशीं दिगम्बराम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ।
सद्यश्छिन्नशिरःखड्गवामाधोर्ध्वकराम्बुजाम् ।
वराभयद्वयालम्बिदक्षिणाधोर्ध्वपाणिकाम् ॥
महामेघनिभश्यामां स्मेराननसरोरुहाम् ।
शवरूपमहादेवहृदयोपरिसंस्थिताम् ॥
अष्टमीशकलाकारचन्द्रालङ्कृतमस्तकाम् ।
शवानां करसङ्घातैः कृतकाञ्चीपरिग्रहाम् ॥
कर्णावतंसतानीतशवयुग्मभयानकाम् ।
सृक्कद्वयगलद्रक्तधाराद्वयविराजिताम् ॥
घोरदंष्ट्रां महारावां पीनोन्नतपयोधराम् ।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्चिताम्'-इत्यादि ॥४॥

वर्गाद्यं वह्निसंस्थं विधुरतिवलितं तत्त्रयं कूर्चयुग्मं
लज्जाद्वन्द्वंच पश्चात स्मितमुखि तदधष्टद्वयं योजयित्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातर्ये वा जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥ ५

बीजसप्तकं दक्षिणे कालिके इति स्वरूपं चोद्धृत्य चरमस्थबीजसप्तकं वह्निजायान्तमुद्धरति । **वर्गाद्यम्**— इति स्मितमुखि भक्तप्रसादायेषद्धास्ययुतवदने । स्मरहरमहिले शिवकलत्रारूपे 'वनिता महिला तथा'-इत्यमरः । मातर्जगज्जननि । उक्तार्थानां विशेषणानां पुनरुपादानं स्वोक्तिदार्ढ्यायैव बोध्यम् । ये वा ये च जनाः स्वरूपमूर्ध्वमित्यादिसूचितम् । काल्पनिकविग्रहं भावयन्तो ध्यायन्तः । वर्गाद्यं कवर्णं वह्निसंस्थं रेफारूढम् । पुनर्विधुरतिवलितम् । विधुरिन्दुर्विन्दात्मकः । रतिर्दीर्घकारः । ताभ्यां वलितं मिलितम् । ललितमिति **पाठान्तरे**ऽपि स एवार्थः । तेन क्रीं इति स्वरूपं सिद्धम् । यद्भवति तत्र यत् तेषां बीजानां त्रयम् । योजयित्वेति चतुर्ष्वपि सम्बध्यते । आदौ निरुक्तबीजत्रयमुच्चार्येत्यर्थः । पश्चात् तदनन्तरम् । इदं वाक्यद्वयान्वयि । कूर्चयुग्मम् । हूँ इति बीजद्वयं योजयित्वा । च पुनः पश्चात् । लज्जायुगं ह्रीं इति बीजद्वयं योजयित्वा तदधस्तत्पश्चात् । ठद्वयं **स्वाहा** इति स्वरूपं योजयित्वा जपन्ति पूर्वक्रमेण योजनेन निष्पन्नं नवाक्षरं मनुं जपपरिपाट्योच्चारयन्तीत्यर्थः । स्मरन्तीति **पाठे** मानसजपपरत्वं ज्ञेयम् । ते भावनापूर्वकजपतत्परा लक्ष्मीलास्यलीलाकमलदृशः । लक्ष्म्या लास्यं श्रीप्रचारो याभ्याम् । लक्ष्मीतज्जनकत्वात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'तदात्मकं लास्यं विक्षेपादिविलासो ययोः' इति वा। तादृशे लीलाकमलदले इव क्रीडार्थं पद्मपत्रे इव दूरौ येषाम्। एतन्मन्त्रप्रजापिद्रुक्पाताद्यनुग्रहमात्रेणापि प्रचुरैश्वर्यलाभो जनानामिति भावः। एतादृशाः सन्तः कामरूपा इच्छानुरूपिविग्रहाः। यद्वा कामान् ईप्सितार्थान् रूपयन्ति साधयन्ति तादृशाः सकलकामनापूरणसमर्था इत्यर्थः। भवन्ति सम्पद्यन्ते। 'लक्ष्मीलास्यरूपा या लीला तत्सम्बन्धि तादृशमत्युत्तमं यत् कमलं तद्दले इव दूरौ यस्यास्तस्या उत्तमस्त्रियाः कामरूपाः प्रार्थनीयत्वरूपा भवन्तीत्यर्थः' इति एके। एतावता द्वाविंशत्यक्षरीस्वरूपं प्रतिपादितम्।

कालीतन्त्रेऽपि।

'कामत्रयं वह्निसंस्थं रतिविन्दुविभूषितम्।
कूर्चयुग्मं तथा लज्जायुग्मं च तदनन्तरम्॥
दक्षिणे कालिके चेति पूर्ववीजानि चोच्चरेत्।
अन्ते वह्निवधूं दद्याद्विद्या राज्ञी प्रकीर्त्तिता' इति ॥५॥

प्रत्येकं वा द्वयं वा त्रयमपि च परं वीजमत्यन्तगुह्यं त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति। तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठपीनस्तनाढ्ये ॥६॥

अवयवान्तराणामपि पृथङ्मनुत्वं स्पष्टतया कथयन्नुपसंहरति। प्रत्येकम्-इति। मुण्डस्रगतिशयलसत्कण्ठपीनस्तनाढ्ये। मुण्डानां स्रक् माला तयाऽतिशयेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लसत् शोभमानं यत् कठपीनस्तनं तेन आढ्या ऐश्वर्यवती शोभमानेति यावत् । युक्ता वा तत्सम्बोधनम् । 'लसत्पीनकुम्भस्तनाढ्ये' इति पाठान्तरे लसन्तौ पीनौ पुष्टौ कुम्भाविव स्तनौ ताभ्यामाढ्येत्यर्थः । देवि द्योतनात्मिके । यद्वा । विजिगीषादियुक्ते । सदा भावयन्तो ध्यानतत्पराः । ये साधकाः । अत्यन्तगुह्यं परमगोप्यं बीजं पूर्वोक्तकाल्यादिबीजम् । प्रत्येकं वा । एकं वा कालीकूर्चं मायान्यतमं वेत्यर्थः । द्वयं वा । कालीकूर्चकालीमायादियुग्मं वा । त्रयमपि । कालीकूर्चमायात्रयमपि त्वन्नाम्ना पूर्वोक्तदक्षिणे कालिके इति स्वरूपेण योजयित्वा आदौ निःक्षिप्येत्यर्थः । जपन्ति । अनेन दश मन्त्राः प्रदर्शिताः । तद्यथा । क्रीं दक्षिणे कालिके १ हूँ दक्षिणे कालिके २ ह्रीं दक्षिणे कालिके इति ३ त्रयः सप्तार्णाः । एवम् क्रीं हूं दक्षिणे कालिके १ क्रीं ह्रीं ततो नाम २ हूँ क्रीं ततो नाम ३ ह्रीं क्रीं ततो नाम ४ हूँ हूँ ततो नाम ५ ह्रीं ह्रीं ततो नाम ६ इति षड्भेदा अष्टार्णाः । क्रीं हूँ ह्रीं ततो नामेति नवार्ण एक इति । तथा परं चावसानस्य च प्रत्येकं वा त्रयं वेत्यर्थः । चकारादादावपि । त्वन्नाम्ना योजयित्वा जपन्तीत्यर्थः । अनेन पूर्वोक्तैकबीजादिपुटितदशमन्त्रभेदाः प्रदर्शिताः । तथा सकलमपि बीजसप्तकं वा त्वन्नाम्ना योजयित्वेत्यर्थः । अनेन बीजसप्तकान्ते नामेति त्रयोदशार्णभेदो बीजसप्तकपुटितविंशार्णभेदश्च प्रदर्शितः। यद्वा सकलमपि । कर्पूरमित्यारभ्य प्रतिपादितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संपूर्णं द्वाविंशत्यक्षरपूर्वोक्तमहाविद्यां वेत्यर्थः । यद्वा । प्रत्येकं वा कालीबीजाद्येकैकम् । द्वयं वा तद्द्वयं त्रयं वा । त्रयमपि तत्त्रयं च त्वन्नाम्ना आदौ योजयित्वा । च पुनः । परं ते विद्यमानमासकलमाकारमात्रघटितं रूपं स्वाहा-इति योजयित्वेत्याद्यर्थः । तेन क्रीं हूँ ह्रीं दक्षिणे कालिके स्वाहा । क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं दक्षिणे कालिके स्वाहा । क्रीं क्रीं क्रीं हूँ हूँ हूँ ह्रीं ह्रीं ह्रीं दक्षिणे कालिके स्वाहा इति मन्त्रत्रयान्यतमं जपन्तीत्यर्थः पर्यवसन्त इति । के चित् तु अत्यन्तगुह्यं बीजं कालीबीजमेव तद्देवैकद्वित्रिक्रमेणादौ नाम्ना योजितमुभयतो वेत्यादिमन्त्रभेदमाहुरित्यलम् । तेषां भावनापूर्वकजपपराणां नेत्रारविन्दे नयनपद्मे कमला लक्ष्मीर्विहरति विलासं करोति । तत्साधकदृष्टिपातेन प्राकृतोऽपि सकलैश्वर्यभाजनं भवतीति भावः । पुनर्वक्त्रशुभ्रांशुबिम्बे वक्त्रं मुखं शुभ्रांशुबिम्बमिव चन्द्रमण्डलमिव तस्मिन् वाग्देवी सरस्वती विहरतीत्यत्रान्वेति । एतन्मन्त्रसाधकः सकलविद्यानिधिश्च भवतीति भावः । एते दक्षिणाभेदास्तन्त्रान्तरेऽपि दर्शिताः ।

तदुक्तं कालिकाश्रुतौ ।

'अथाहुः सर्वविद्यामन्त्रे भेदाँस्तु प्रथममेकद्वयं त्रयं वा नामद्वयं संपुटितं वा कृत्वा यो जपति तस्यास्तीति नान्यस्य गतिरस्तीत्यादि' ।

कालीतन्त्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'निजबीजं ततः कूर्चं' लज्जाबीजं ततः परम् ।
दक्षिणे कालिके चेति तदन्ते वह्निसुन्दरी ॥
एकादशाक्षरी विद्या चतुर्वर्गफलप्रदा ।
मूलबीजद्वयं ब्रूयात् ततः कूर्चद्वयं वदेत ।
लज्जायुग्मं समुद्धृत्य सम्बोधनपदद्वयम् ।
स्वाहान्ता कथिता विद्या चतुर्वर्गफलप्रदा ॥
मूलत्रयं ततः कूर्चत्रयं मायात्रयं तथा ।
सम्बोधनपदद्वन्द्वमन्ते च वह्निसुन्दरी ॥
एषा विद्या महादेवी काली सान्निध्यकारिणी'-इति ।

कुमारीतन्त्रेऽपि ।

'कामाक्षरं वह्निसंस्थं रतिबिन्दुविभूषितम् ।
मन्त्रराजमिदं ख्यातं दुर्लभं पापकर्मणाम् ॥
भोगमोक्षैकनिलयं कालिकाबीजमुत्तमम् ।
एकं द्वयं त्रयं वाऽपि निजबीजवदुत्तमम् ॥
दक्षिणे कालिके नाम पुटितं वा यथोदितम् ।
निजबीजं तथा कूर्चं लज्जाबीजमिति त्रयम् ॥
एकद्वित्र्यादिपूर्वं स्यात् सम्बोधनपदद्वयम् ।
पुटितं वा तथा पूर्वबीजैरेकादिकैरिति ॥
नाम ठद्वयमित्याद्या भेदाः स्युर्दक्षिणागताः' इत्यादि ।
एवं च प्रत्येकमित्याद्युक्तदक्षिणामनुजपतत्पराणां सकलैश्वर्यं विद्यादिलाभश्चानायासेनैव भवतीति भावः ॥६॥

गतासूनां बृंदुपकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
प्रसक्तां त्वां ध्यायन् जननि जडचेता अपि कविः॥६

तदेवं मन्त्रस्वरूपमभिधाय ध्यानविशेषमाह। गता-
सूनाम्-इति। जननि जगन्मातः। त्रिभुवनविधात्रीं ब्रह्माद्युत्पादनद्वारा लोकत्रयसृष्टिकर्त्रीम्। तथा त्रिनयनां सोमसूर्याग्निनेत्राम्। तथा गतासूनां शवरूपकामक्रोधादि-रिपूणां बाहुप्रकरैर्बाहुसमूहैः कृता निष्पादिता या काञ्ची रशना तया परिलसन् शोभमानो नितम्बः कटिपश्चा-द्भागो यस्यास्ताम्। स्वभक्तानां कामादिदोषनिवृत्तय एव तथाकरणमिति भावः। तथा दिग्वस्त्रां दिगम्बरा-मन्तरीयादिशून्यामित्यर्थः। तथा श्मशानस्थे महाश्म-शानवर्त्तिनि। शवहृदि महादेवशवहृदयरूपे। तल्पे शय-नीये। यद्वा श्मशानस्थे तल्पे विद्यमानो यः शवात्मकः शिवस्तस्य हृदये इत्यर्थः। महाकालसुरतप्रसक्ताम्। महाकालेन सृष्ट्यर्थमुत्पादितेन भर्त्रा यत् सुरतं विपरीतरतं तत्र प्रसक्तां प्रवृत्ताम्। त्वां ध्यायन् स्म-रन्। एतद्रूपध्यानपूर्वकं त्वन्मनुं जपन्निति भावः। जडचेता अपि मूढहृदयोऽपि
कविर्विचक्षणो भवतीति शेषः। अत्र पूर्वोक्तचतुर्बाहुत्वा-दिकमपि ध्येयरूपप्रविष्टं ज्ञेयम्।

इदं ध्यानं कालीतन्त्रेऽपि।

'करालवदनां देवीं मुक्तकेशीं दिगम्बराम्।
चतुर्भुजां दशशिनेत्रां तु रक्तविस्फुरिताननाम्॥
शवहस्तसहस्रैस्तु बद्धकाञ्चीं श्मशानगाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सद्यश्छिन्नशिरःखड्गवराभीतिकराम्बुजाम् ॥
शवरूपमहादेवहृदयोपरि संस्थिताम् ।
महाकालेन च सार्धं विपरीतरतातुराम् ॥
एवं ध्यायन् महाकालीं सर्वसिद्धीश्वरो भवेत्'-इति ।

तत्त्वं तु गतास्वादिविशेषणप्रकाशितस्वरूपां कालीं मूलाधारस्थस्वरूपभूलिङ्गोपरिस्थितामाज्ञाचक्रोर्ध्वस्थकालात्मकपरमशिवेन सम्बन्धरूपरते प्रसक्तां ब्रह्मविग्रहकुण्डलीरूपां ध्यायन् मूर्खोऽपि तत्त्वसाक्षात्कारवान् भवतीति विभावनाप्रकारोपदेशोऽपीत्यलम् ॥ ७ ॥

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः ।
परं संकीर्णायां प्रकटितचितायां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरि सुरतेनातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥८॥

'श्मशानवह्निमध्यस्थाम्'-इति स्वतन्त्रोक्तरीत्या बोधितं ध्यानान्तरमप्याह । शिवाभिः-इति । घोराभिर्भयोत्पादिकाभिः शिवाभिः शृगालीरूपमुक्तिभिः ।

तदुक्तं श्यामाकल्पे ।

'शिवामुक्तिः समाख्याता तद्युक्ता मोक्षतत्परा'-इति ।

यद्वा शिवाभिर्योगिनीभिः । तथा शवानां निवहस्य समूहस्य यानि मुण्डानि तेषामस्थिनिकरैस्तस्य मुण्डैरस्थिनिकरैश्च वा । परमत्यन्तम् । संकीर्णायां व्याप्तायाम् । प्रकटितचितायां प्रज्वलच्चितायाम् । प्रविष्टां प्राप्ताम् । तथा उपरि सुरतेन विपरीतरतेन । सन्तुष्टां स-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तोषजन्यस्मेरादियुक्ताम्। उपरि सुरतेनेति फलस्य हेतुत्वविवक्षया तृतीया। विपरीतरतार्थं प्रविष्टां सन्तुष्टां संभोगजन्यसन्तोषयुक्तामित्यर्थः। तथाऽतियुवतीं प्रौढयौवनाम्। सौन्दर्यादिना सकलयुवतीवृन्दमतिक्रान्तां वा। 'अपि युवतीम्'-इति क्व चित् पाठेऽपिश्चार्थे। तथा हरवधूं शिवकलत्ररूपां त्वाम्। सदा यत्किञ्चिदवस्थायां ये ध्यायन्ति स्मरन्ति एतादृशध्यानपूर्वकं जपं ये कुर्वन्तीति भावः। तेषां क्वचिदपि यत्किञ्चित्संकटेऽपि परिभवोऽपमानादिरूपतिरस्कारो न भवति। एवं चैवं भावयतः साधकस्य पूर्वोक्तमन्त्रजपाज्जगत्पूज्यत्वादिप्राप्तिर्भवतीति भावः। अत्रोक्तेषु ध्यानेषु बहुधर्माणां तन्त्रान्तरे साधारण्येन प्रतिपादनात् श्मशाने शवशिवहृदयस्थत्वं तत्रैव विपरीतरतासक्तत्वं चितायां वा तथेति भेदकं रूपं पर्यवसन्नमभ्युपेयम्। 'पूर्वोक्तध्यानेनान्वयाद्ध्यानद्वैविध्यमेवैतावताऽत्र बोधितम्'-इति-अन्ये। तत्त्वं तु 'मूलाधारस्थत्रिकोणवह्निकुण्डे प्रविष्टामित्यादिपूर्वभावना प्रकारविशेषोपदेशोऽपीत्यन्यत्र विस्तरेण निरूपितम् ॥८॥

वदामस्ते किं वा जनानि वयमुच्चैर्जडाधियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम्।
तथाऽपि त्वद्भक्तिर्मुखरयति चास्माननामिते
तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः ॥९॥

ननु—

'महाविद्या सिद्धविद्या विद्याभेदैः प्रतिष्ठिता।
उपविद्यादिभेदैश्च कालिकैव सदा भुवि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वविद्याः कालिकायां संस्थिता एव पार्वति' ।

इत्यादितन्त्रवचनैराराधितायाः सकलविद्यारूपत्वेनेदं न्यूनमित्याशङ्क्य तस्याः सर्वात्मकत्वेन सर्वातीतत्वेन च सर्वदुर्ज्ञेयत्वादिदमुपलक्षणमित्याह । वदामः-इति । अनमिते नतिशून्ये । सकलवन्द्ये इति भावः । यद्वा ऋजुशरीरे प्रगल्भस्वभावे इत्यर्थः । जननि जगन्मातः । यद्यपीत्यादि ते तव । परमं सर्वान्तर्मनोवागतीतं वा तत्त्वं तच्च गुणसाकल्यं पारमार्थिकस्वरूपं वा । धाता ब्रह्मा न वेत्ति न जानाति वर्णयितुं न शक्नोतीति भावः । क्रियापदमग्रेऽप्यन्वेति । एवमीशोऽपि शिवोऽपि न वेत्ति हरिरपि विष्णुरपि न वेत्ति । उच्चैर्जडधियोऽतिमूढबुद्धयो वयम् । किंवा कियद्वा कथं वा वदामः । कथञ्चिदपि तव तत्त्वज्ञाने नास्माकं सामर्थ्यमिति तद्वर्णनं दुर्घटमेवेति भावः । तथाऽपि वर्णनसामर्थ्याभावेऽपि । त्वद्भक्तिस्त्वद्गुणासक्तिः । अस्मान् मुखरयति वाचालयति गुणान् वक्तुं प्रेरयतीत्यर्थः । तदेतत् अनिर्ज्ञातवर्णनरूपं चापलम् । यद्वा तत् तस्मात् एतत् पूर्वोक्तचापलं क्षन्तव्यं सोढव्यम् । ब्रह्मादीनामपि स्तुतयोऽवसन्नाः का कथाऽन्येषामिति दयया वयं क्षन्तव्या इति भावः । ननु 'यतोवाचः' इति श्रुतेः । ब्रह्मादीनां स्तुतेरवसन्नत्वेऽपि तेषामपरोक्षात्मतत्त्वसाक्षात्काराऽन्न तत्तुल्यतोऽन्येषामत आह । पशुरोषः पशुषु पाशाष्टकवद्धेषु रोषः क्रोधः । अनिर्ज्ञातकारित्वादिनेति भावः । न खलु नैव समुचितो युक्तः ।

पाशाष्टकमुक्तं रुद्रयामले ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

'घृणा शङ्का भयं लज्जा जुगुप्सा चेति पञ्चमी ।
कुलं शीलं तथा जातिरष्टौ पाशा इमे स्मृताः ॥
पाशबद्धः सदा जीवः पाशमुक्तः सदाशिवः'-इति ।

तथा च यथा पाशबद्धा दुःखव्याकुला युक्तायुक्तज्ञानविधुराअप्यनुकम्प्याः । एवं वयमपि त्वन्मायाकृतपाशबद्धत्वादनुकम्प्या एवेति भावः । 'चास्माकमसिते'-इति पाठान्तरे । असिते श्यामरूपे । अस्माकमिति शेषत्वविवक्षायामितिद्रोध्यम् ॥ ६ ॥

समन्तादापीनस्तनजघनदृग्यौवनवती-
रतासक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः ।
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः१०

अथाधिकारिविशेषोद्देशेन रात्रिजपे विशेषमाह । समन्तात्-इति । विवासा नग्नः । तथा गलितचिकुरो विकीर्णकेशकलापः । तथा समन्तादापीनस्तनजघनदृग्यौवनवतीरतासक्तः । समन्तात् सर्वतः । आपीनं पुष्टं स्तनजघनं यस्याः । प्रशस्तानि दृग्यौवनानि यस्याः । पश्चादुभयोः कर्मधारयः । तया तस्यां वा यद्रतं तत्रासक्तः प्रवृत्तः । 'जघनभृद्यौवन'-इति पाठान्तरे । तादृशं स्तनजघनं बिभर्त्ति तादृशी चासौ यौवनवती चेति कर्मधारयः । त्वां पूर्वोक्तरूपां ध्यायन् मन्त्राभेदेन स्वाभेदेन वा स्मरन् । यद्वा दक्षिणाचारे पत्नीं वामाचारे कुलनायिकां त्वद्रूपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथा ध्यायन्नित्यर्थः । इदमुपलक्षणम् । आत्मानंशिवरूपतया ध्यायँश्चेत्यर्थः ।

तदुक्तं कुमारीतन्त्रे ।

'पत्नीं ज्ञेयान्महादेवीमात्मानं च महेश्वरम् ।
ऐक्यभावेन संपश्येत् स शिवः सन् गृहाश्रमी'-इति ॥

तन्त्रराजेऽपि ।

'भोगः स्वकीयकान्ताभिर्वत्तिणाचार इत्ययम्'-इति ।

एतादृशस्तव भक्तो मनुं पूर्वोक्तं यदि जपति तदा तस्य साधकस्य समस्ताः सर्वेऽपि सिद्धौघाः सिद्धसङ्घाः। 'सिद्धयौघा'-इति पाठान्तरम् । वशगा अधीना भवन्तीति शेषः । तथा स साधकः कविर्विचक्षणः सन् भुवि चिरतरं बहुकालं जीवति । दिव्यसुखभोगेन प्राणान् निर्वहतीत्यर्थः । तथा चेतादृशनियमपूर्वकरात्रिजपो दिव्यैश्वर्यप्रदो भवतीति रात्रिजपे विशेषोऽवधार्य इति भावः । तन्त्रान्तरेऽप्ययं विशेषः प्रतिपादित इति वशीलक्षम्-इत्यत्र वक्ष्यते ॥ १० ॥

समाः स्वस्थीभूतां जपति विपरीतां यदि सदा
विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ।
तदा तस्य क्षोणीतलविहरमाणस्य विदुषः
कराम्भोजे वश्या हरवधु महासिद्धिनिवहाः ॥११॥

पूर्वोक्तध्यान एव विभावनीयं विशेषान्तरमाह समा इति । हरवधु शिवकलत्ररूपे । त्वां विपरीतां पुरुषवद् इत्यर्थं महाकालोपरि समारूढां विचिन्त्य आदौ स्मृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोऽतिशयमहाकालसुरतामतिशयेनाधिक्येन महाकालेन सुरतं यस्यास्तां विरचितप्रौढसुरतां सतीमिति यावत्। समा बहुवर्षाणि। 'हायनोऽस्त्री शरत् समाः' इति-अमरः। अत्यन्तसंयोगे द्वितीया। स्वस्थीभूतां निश्चालां निराकुलतया स्वव्यापारस्थितया। यद्वा समा अतिशयमहाकालसुरतां सतीं स्वस्थीभूतां तृप्तामित्यर्थः। एतादृशीं त्वां ध्यायन्।

'विपरीतरतिं कृत्वा महाशून्यं विधाय च।
त्रिंशद्वर्षदशद्वृन्दपञ्चाशत्पद्मकोटयः॥
युगानि परमेशानी विपरीतरताऽभवत्।
विपरीतरतो देवि विन्दुरेकोऽभवत् पुरा'॥

इत्यादिरुद्रयामलादितन्त्रवाक्यादनेकयुगपर्यन्तं तदावरणमिति सृष्टिनिदानतादृशलीलावत्त्वेनापि चिन्तनीयेति भावः। सदा सर्वकालं यत्किञ्चित्काले इति यावत्। यदि जपति तदा क्षोणीतलविहरमाणस्य पृथिव्यां नानाविहारशालिनो विदुषो दिव्यज्ञानभाजस्तस्य साधकस्य महासिद्धिनिवहाः दिव्यैश्वर्यसमूहाः कराम्भोजे वश्या हस्तस्थिता सेवाधीना भवन्तीति शेषः। एवं चैवम्भावितात्वे भोगज्ञानोभयदेति सकलकामनापूरणी त्वमेवेति भावः। यद्वा निरुक्तध्यानविशिष्टां त्वां सदा ध्यायन् विपरीतां पूर्वोक्तबीजवैपरीत्ययुतां विचिन्त्य यदि जपतीति मन्त्रान्तरमपि प्रदर्शितम्।

तदुक्तं **विश्वसारे**।

'अथान्यां संप्रवक्ष्यामि विद्यां विंशतिवर्णिकाम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रीं ह्रीं ह्रूँ युगलं त्रिः क्रीं दक्षिणे कालिके वदेत् ॥
त्रिः क्रीं ह्रूँ ह्रूँ शक्तियुग्मस्य न्यासादि पूर्ववत् ।
एकविंशत्यक्षरोऽयं ताराद्यः कालिकामनुः ॥
स्वाहान्तश्च त्रयोविंशत्यक्षरो मन्त्रराजकः ।
ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरेत्'-इति ॥११॥

प्रसूते संसारं जननि जगतीं पालयति या
समस्तं क्षित्यादि प्रलयसमये संहरति च ।
अतस्त्वां धाताऽपि त्रिभुवनपतिः श्रीपतिरपि
महेशोऽपि प्रायः सकलमपि किं स्तौति भवतीम् ॥१२॥

सृष्ट्यादिसामर्थ्यदा त्रिदेवोपास्याऽनन्तगुणा त्वमेवेति पूर्वोक्तफलनिर्देशः सर्वथोपलक्षणमेवेत्याह प्रसूते-इति । जननि जगन्मातः । भवतीत्याक्षेपः । भवती संसारं जगत् प्रसूते उत्पादयति । जगतीं त्रिलोकीं पालयति वा रक्षति च । 'जगतीम्'-इत्यत्र 'भवतीम्'-इति पाठे भवतीत्यस्य नाक्षेपः । संसारमित्यस्य समस्तमित्यस्य वा पालनक्रियाकर्मतयाऽन्वयः । तथा प्रलयसमये कल्पान्तादौ समस्तं सम्पूर्णं कार्यकारणविशिष्टं क्षित्यादिपञ्चभूतं संहरति च । स्वात्मनि लीनं करोति च । तथा ब्रह्मादिशक्तद्वारा सृष्ट्यादिनिर्वाहिका त्वमेवेति भावः । अतः सकलजगत्कर्मनिर्वाहकत्वात् त्रिभुवनपतिस्त्रिलोकेशः । इदं त्रिषु विशेषणम् । धाताऽपि ब्रह्माऽपि । श्रीपतिरपि विष्णुरपि । महेशोऽपि महादेवोऽपि । भवतीं पूज्यां त्वां प्रायोऽसाकल्येन स्तौति । अपि मादृशो जनः । किं कथं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सकलं सम्पूर्णं स्तौति। यद्वा ब्रह्मादयोऽप्यसाकल्येन स्तुवन्ति चेदन्यः समर्थः कश्चित् सकलमपि साकल्येनापि स्तौति किमिति काकुः। न स्तौतीत्यर्थः। त्रिपुरुषातिरिक्तातिसमर्थाभावादिति भावः। 'किं स्तौति'-इत्यत्र 'संस्तौति'-इति पाठे। सकलमपि तस्मिन् न ऋष्यादिवृन्दमपि प्राप्तः संस्तौतीत्यर्थः। एवं चानेककोटिब्रह्माण्डसृष्ट्यादिसम्पादिका त्रिपुरुषादिदुरधिगमतत्त्वा त्वमेवेति नास्मदादिभिः स्तोतुं सर्वथा शक्यसे इति भावः॥ १२॥

अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्
विमूढास्ते मातः किमपि न हि जानन्ति परमम्।
समाराध्यामाद्यां हरिहरविरञ्च्यादिविबुधैः
प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम्॥ १३॥

ननु-'आरोग्यं भास्कराद्विन्द्यात्'-इत्यादिनाऽऽरोग्यादेरितरदेवताप्रसादसापेक्षत्वबोधनात् लोकेऽपि तत्तत्कामनावत्तां तत्तद्देवताराधनप्रवृत्तिदर्शनाच्च सकलकामितलाभो न तदुपासकस्य स्यादत आह। अनेके इति। मातर्जगज्जननि विमूढा वाचा व्यामोहिताः। अनेके बहवः। भवदधिकगीर्वाणनिवहान्। भवत्या अधिकत्वेनाभिमताः। ये गीर्वाणनिवहाः सूर्यादिदेवसमूहास्तान्। यद्वा भवदुत्पद्यमानमधिकमतिरिक्तमारोग्यादिरूपं फलं येभ्यस्तादृशाँश्च तान् देवानित्यर्थः। यद्वा भवद्विद्यमानमधिकमुत्कर्षशालि येभ्योऽन्यदेवानां सातिशयत्वात्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्चात् कर्मधारयः । सेवन्ते आराधयन्ति । ते तव परमं सर्वदेवात्मकत्वादिरूपं तत्त्वं किमपि यत्किञ्चिदपि न जानन्ति । यद्वा ते इति बहुवचनान्तः । अनेके ये सेवन्ते ते किमपि न जानन्तीत्यध्याहारेण योजनं ज्ञेयम् । हि यत एवं तत इत्यर्थः । हरिहरविरञ्च्यादिविबुधैर्विष्णुरुद्रब्रह्मादिदेवैः 'विरिञ्च्यादिभिरपि'-इति पाठान्तरम् । समाराध्यां संसेवनीयामाराधितामिति यावत् । तथा रतिरसमहानन्दनिरताम् । रतिरसेन महाकालेन सह सुरतानुभवेन यो महानन्द उत्तमानन्दः । तत्र निरतामासक्तामिव तदनुकूलव्यापारतत्पराम् । यद्वा सुरतानुभवरूपमहेन उत्सवेनानन्द इत्यादिपूर्ववदर्थः ।

यद्वा रतिरसः स्थायिभावात्मको रसस्तद्रूपो महानन्दो ब्रह्मानन्दस्तन्मयीमित्यर्थः । आद्यां सकलदेवप्रपञ्चकारणभूतां कालिकारूपां त्वाम् । स्वैरमितरनिरपेक्षं यथा स्यात् तथा प्रपन्नोऽस्मि मतिवाक्कायैः समाश्रितोऽस्मि । तथा च सकलदेवतोपास्यरूपा निरतिशया त्वमेवेति त्वदुपासकानामनायासेनैव सकलकामितलाभो निर्बाध इति भावः । अन्ये तु 'न हि नैवेत्यर्थः । अहं तु त्वन्मुखादज्ञाततत्त्वस्त्वामेव शरणं प्रपन्न इत्यादि' व्याख्यानमाहुः ॥ १३ ॥

धरित्री कीलालं शुचिरपि समीरोऽपि गगनं
त्वमेका कल्याणी गिरिशरमणी कालि सकलम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुतिः का ते मातस्तव करुणया मामगतिकं
प्रसन्ना त्वं भूया भवमननुभूयान्मम जनुः ॥१४॥

सकलदेवप्रपञ्चकारणत्वं स्पष्टयति धरित्री इति। कालि श्यामरूपे कालप्रेरिके वा। मातः सकलकारणरूपे। धरित्री पृथिवी। कीलालं जलम्। 'पयः कीलालममृतम्' इति अमरः। शुचिरपि वह्निरपि। 'शुचिरप्पित्तम्'-इति-अमरः। समीरोऽपि वायुरपि। गगनं नभः पृथिव्यादिस्वरूपमिति यावत्। सकलं जगज्जातम्। यद्वा सकलं कारणादिविशिष्टं धरित्र्यादीत्यर्थः। कल्याणी मङ्गलरूपा। गिरिशरमणी शिवलीलासाधिनी। एका सृष्ट्यादावेकरूपेण स्थिता त्वमसि-इति शेषः। त्वद्रूपमेवेदं सर्वं जगदिति भावः। यद्वा एतत्सर्वं त्वं त्वद्रूपं भवतीत्यर्थः। ते तव स्तुतिः कामितविशेषदातृत्वब्रह्माद्युपास्यत्ववर्णनरूपा मदुक्तिः का कियती अतिस्वल्पैवेत्यर्थः। पुरुषार्थचतुष्टयप्रदानसमर्थायास्तव कथञ्चिदपि स्तुतिरत्रैव पर्यवस्यतीति भावः। अतोऽगतिकमनन्यशरणं प्रसादोपायस्तुत्याद्यसमर्थं वा। भवं त्वत्त उत्पन्नं पुत्रवद्दयार्हमिति भावः। मामनुलक्षीकृत्य त्वम्। तव करुणया स्वकीयदयालुस्वभावेन। यद्वा स्तवे स्तोत्रे करुणाविशिष्टफलजनकत्वेच्छा तया। 'खर्परे वा शरि' इति विसर्गलोपः। प्रसन्ना भूयाः। मम जनुर्जन्म न भूयात् माभूत्। एवं च सकलकामितदानसामर्थ्येऽपि त्वयि त्वत्तो मोक्ष एव प्रार्थनीय इति भावः। अन्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तु 'मात-इत्यत्र मा अत इति छेदेन मा लक्ष्मीरूपा च त्वमेवेत्यादिव्याख्यया अत इत्युत्तरवाक्ये हेतुतया चित्तस्य नाध्याहारापेक्षाऽपि'-इत्याहुः । 'भवमनु' इत्यत्र 'पुनरपि' इति पाठे त्वनध्याहारः ॥ १४ ॥

श्मशानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः
सहस्रं त्वर्काणां निजगलितवीर्येण कुसुमम् ।
जपँस्तत् प्रत्येकं मनुमपि तव ध्याननिरतो
महाकालि स्वैरं स भवति धरित्रीपरिवृढः ॥ १५ ॥

तदेवं मन्त्रध्यानादिकमभिधायाधिकारविशेषोद्देशेन प्रयोगमाह श्मशानस्थ इति । महाकालि महाकालकलत्रस्वरूपे । श्मशानस्थः श्मशाने स्थितः । तथा स्वस्थोऽव्यग्रः । तथा गलितचिकुरो विकीर्णकेशकलापः । तथा दिक्पटधरो नग्नः । तथा तव ध्याननिरतः पूर्वोक्तत्वत्स्वरूपध्यानतत्परः । तवेत्यस्य मनुमित्यत्रान्वयो वा । यस्तत्प्रत्येकं प्रतिहविः । मनुमपि मन्त्रमपि जपन् सन् निजगलितवीर्येण स्वीयच्युतरेतसा सहितमित्यर्थः । सहस्रमेतत्संख्याकम् । अर्काणामर्कवृक्षाणां कुसुमं पुष्पम् । वितरतोत्यध्याहोयते । पूजोद्देशेन क्षिपति जुहोति वा इत्यर्थः । सोऽधिकः स्वैरमितरनिरपेक्षम् । धरित्रीपरिवृढः पृथिवीनाथको भवति । अयं प्रयोगस्तन्त्रान्तरेऽपि दर्शितः ।

तथा कलीतन्त्रे ।

'स्वरेतोभ्यक्तपत्रेणाप्यर्कस्यैव सहस्रशः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्मशानेऽभ्यर्चयेद्देवीं सर्वसिद्धिं स विन्दति'-इति ।

विश्वसारेऽपि ।

'श्मशानस्थो भवेत् स्वस्थो गलितं चिकुरं चरेत् ।
दिगम्बरः सहस्रं च सूर्यपुष्पं समानयेत् ॥
स्ववीर्येण युतं कृत्वा प्रत्येकं प्रजपन् स च'-इति ।

तत्त्वं तु 'एकान्तस्थितोऽव्यग्रोऽभ्यञ्जनारहितो निरावृतदेशे शीतोष्णादिसहनशीलो यः साधकः सूर्यसहस्रभास्वरदयादिपुष्पं स्वकीयोत्पन्नभावनात्मकसामर्थ्येन वितरति स सकललोकपूज्यो नियन्ता भवति' इति भावना प्रकारोपदेशोऽपीति ज्ञेयम् ।

तदुक्तमुत्तरतन्त्रेऽपि ।

'अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
दया पुष्पं क्षमा पुष्पं ज्ञानपुष्पं च पञ्चमम् ।
इत्युक्तैरुत्तमैः पुष्पैः पूजयेत् परदेवताम्'-इति ॥१५॥

गृहे सम्मार्जन्या परिगलितवीर्यं हि चिकुरं
समूलं मध्याह्ने वितरति चितायां कुजदिने ।
समुच्चार्य प्रेम्णा मनुमपि सकृत् कालि सततं
गजारूढो याति क्षितिपरिवृढः सत्कविवरः ॥१६॥

पूर्ववत् प्रयोगान्तरमाह गृहे इति । कालि श्यामरूपे । यः साधकः । कुजदिने भौमवासरे । मध्याह्ने मध्यदिने । यद्वा अह्न इदमाह्नं षष्टिघटिकात्मकभागसम्बन्धी रात्रिभागस्तस्य मध्य इत्यादिव्याख्यानेन मध्यरात्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यर्थः । प्रेम्णा भक्त्या मनुं मन्त्रं सकृदपि एकवारमपि समुच्चार्य संजप्य । परिगलितवीर्यं परिगलितं मिलितं वीर्यं यस्मिन् तत् । 'वीर्येण' इति पाठे कर्मधारयः । तेन सहितमित्यर्थः । समूलमुत्पुटितम् । चिकुरं केशम् । 'कुसुमम्'-इति पाठे । समूलं बीजात्मकयोनिजलेन सहितं कुसुमं स्त्रीरज इति व्याख्येयम् । इदं कुलद्रव्याभिधेयम् । तन्त्रान्तरे तद्ग्रहणप्रकारो दर्शितः । गृहे स्वगृहे कौलिगृहे वा विद्यमानयेति शेषः । सम्मार्जन्या शोधिन्या । 'सम्मार्जनी शोधनी स्यात्'-इति अमरः । चितायां श्मशानस्थो वितरति जुहोति ससत्कविवरः महाकविश्रेष्ठः क्षितिपरिवृढः पृथिवीनायकश्च सन् सततं यावज्जीवं गजारूढो हस्तिवाहनो याति संचरति । एतत्प्रयोगसाधनेनोत्तमैश्वर्यलाभादिति भावः । केचित् तु 'गृहे सम्मार्जन्या दास्यादिकुलाङ्गनया । परिगलितं तत्सङ्गमेन निष्पन्नम्'-इत्यर्थान्तरमाहुः । अयं प्रयोगस्तन्त्रान्तरेऽपि ।

तथा च कुलचूडामणौ ।

'नखं केशं स्ववीर्यं च यद्यत् सम्मार्जनीगतम् ।
मुक्तकेशो दिगावासो मूलमन्त्रपुरःसरम् ॥
कुजवारे मध्यरात्रौ जुहुयाद्वै श्मशानके' इति ।

उत्तरतन्त्रेऽपि ।

मांसं रक्तं तिलं केशं नखं भक्तं च पायसम् ।
आज्यं चैव विशेषेण जुहुयात् सर्वसिद्धये ॥
एवं कृतेन सर्वत्र लभते सिद्धिमुत्तमाम्' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रयोगे संख्यायाः अनुपादानात् तन्त्रान्तरोक्तमष्टोत्तरसहस्ररूपं ज्ञेयम् ।

तथा चोक्तं कुलचूडामणौ ।

'यस्मिञ्जपे च होमे च संख्या नोक्ता मनीषिभिः ।
तत्रेयं गणना प्रोक्ता गजाधिकसहस्रकम्'-इति ॥

तत्त्वं 'मूलाधारस्थवह्निकुण्डत्रितायां स्वतः प्रकाशत्वादिसामर्थ्याहारकं वासनासहितमहङ्कारासत्यादिरूपं हविः कुण्डलिनीगृहे विद्यमानयाबुद्ध्या हुतं भावयेदित्यन्तर्यागप्रकारोपदेशोऽपि*'-इति बोध्यम् ।

तदुक्तमुत्तरतन्त्रे ।

'मूलाधारगते देवि देवताग्निसमुज्वले ।
धर्माधर्मान्विते त्यक्त्वैमूँलमन्त्रपुरःसरम् ॥
अहं जुहोमि स्वाहेति प्रत्येकं जुहुयात् सुधीः ।
अहन्तासत्यपैशून्यकामक्रोधादिकं हविः ॥
मन एव स्रुवः प्रोक्त उन्मनी स्रुगुदीरिता' इति ॥१६॥

सुपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् जपति यदि भक्तस्तव मनुम् ।
स गन्धर्वश्रेणीपतिरिव कवित्वामृतनदी-
नदीनः पर्यन्ते परमपदलीनः प्रभवति ॥ १७ ॥

पूर्ववत् प्रयोगान्तरमाह सुपुष्पैः-इति । सुपुष्पै रजोभिः । यद्वा तत्कालपूजनकुसुमैः । आकीर्णं व्याप्तम् ।

* अन्तर्यागविधिः पुरश्चर्यार्णवे विशेषतोऽभिहितः । द्रष्टव्यः पुरश्चर्यार्णवस्य पृष्ठे १८५, ३३२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुसुमधनुषः कन्दर्पस्य । मन्दिरं गृहं योनिम् । पुरोऽग्रे । ध्यायन् ध्यायन् अविच्छेदेन स्मरन् । भक्तस्त्वदुपासकः । तव मनुं मन्त्रं यदि जपति स जापकः गन्धर्वश्रेणीपतिरिव चित्ररथादिरिव भवतीत्यत्रापि सम्बध्यते सङ्गीततत्त्वाद्यभिज्ञो जायत इति भावः । यद्वा त्रयाणामेकान्वयः । तथा कवित्वामृतनदीनदीनः । कवित्वरूपं यदमृतं तस्य या नदी तस्या नदीनः समुद्र इव पतिरित्यर्थः । यद्वा तादृशनद्या न दीनो न रिक्तः । तथा पर्यन्ते भूप्रान्ते परमपदलीनोऽत्युत्तमपदवीं प्राप्तः सन् । प्रभवति प्रभुर्भवति । यद्वा पर्यन्तेऽवसाने परमपदलीनो निर्विकारब्रह्मस्वरूपसाक्षात्कारवान् सन् ब्रह्मैव भवतीत्यर्थः ।

अयं प्रयोगः कुलार्णवेऽपि ।

'ऋतुमत्या भगं पश्यन्नयुतं प्रजपेन्नरः ।
अनर्घ्यकविता तस्य गद्यपद्यमयी भवेत्'-इति ॥

कालीतन्त्रेऽपि ।

'कुलागारं पुष्पितायाः पश्यन् जपति यो नरः ।
अयुतैकप्रमाणेन साधकः स्थिरमानसः ॥
केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत्'-इति ।

अत्र विशेषाभिधानादयुतसंख्यैव प्रयोगो बोध्यः । तत्त्वं तु 'मूलाधारस्थं त्रिकोणं दयादिपूर्वोक्तपुष्पैर्व्याप्तमिति भावनाप्रकारविशेषोऽपि'-इति बोध्यम् ॥ १७ ॥

त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोर्ध्वमदनरसलावण्यनिरताम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जनो यो ध्यायेत् त्वामपि जनानि स स्यात् स्मरहरः १८

यन्त्राविशेषभावनायुक्तं ध्यानप्रकारमाह। त्रिपञ्चार- इति। जनानि जगन्मातः। नक्तं रात्रौ स्वयमपि रतानन्दनिरतो नायिकासम्भोगप्रसक्तः समासक्तः सम्यक् जपसंख्यापूर्त्तिपर्यन्तव्यासक्तः स्थिरो यो जनः प्राकृतोऽपि साधकः। त्रिपञ्चारे। त्रिरावृत्ताः पञ्च त्रिपञ्च। पञ्चदश आराः कोणा यस्मिंस्तत् तस्मिन् पञ्चत्रिकोणघटिते इत्यर्थः। पीठे यन्त्रे।

कालीतन्त्रेऽपि।

'आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत्।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम्॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः।
वृत्तं वा भूपुरं चैकं त्रिगुणं वा लिखेत् सुधीः'-इति॥

अत्रत्यं तत्त्वमन्यत्र* विस्तरेण निरूपितम्। शवशिवहवि उत्तानशवरूपशिववक्षःस्थले महाकालेन सहेति यावत्। उच्चैर्मदनरसलावण्यनिरताम्। उच्चैर्मदनरसः प्रौढः सुरतम। तस्य तत्र वा यल्लावण्यं सौन्दर्यं विचित्राङ्गविलासादिर्वा। तत्र निरतां तत्परां सौरतविलासदक्षाम् तादृशध्यानसुरतादिपुरुषे दयावतीं वा। अत एव स्मेरवदनां प्रमोदजन्येपद्मास्ययुक्तां त्वां ध्यायेदपि।

* द्रष्टव्यं पुरश्चर्यार्णवस्य पृष्ठम् ११४८।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिशब्देन बहुक्लेशनैरपेक्ष्यं सूचितम् । ससाधकोऽपि शब्दस्यात्रान्वयो वा । स्मरहरः सदाशिवः । स्याद् भवेत् । भावनासिद्ध्या विषयवशीभावादिरहितः संपद्यत इति भावः । अत्र भावनाप्रकारोऽपि पूर्वोक्तरीत्याऽवधेयः ॥ १८ ॥

सलोमास्थि स्वैरं पललमपि मार्जारमसितं
परं मैषं वौष्ट्रं नरमहिषयोश्छागमपि वा ।
बलिं ते पूजायामपि वितरतां मर्त्यवसतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥१९॥

अथ बलिदानप्रकारमाह **सलोम**-इति । **असितं** श्यामरूपे यद्वा मायादिबन्धशून्ये । तव पूजायां काम्याद्यर्चने । सलोमास्थि रोमास्थिसहितं स्वैरं यत्किञ्चिज्जातीयम् । मार्जारमपि मार्जारसम्बन्धि वा । परमुत्तमम् । मैषं वा मेषसम्बन्धि वा । औष्ट्रं वा उष्ट्रसम्बन्धि वा । 'वौष्ट्रम्'-इत्यत्र 'मौषम्-' इति **पाठान्तरे** मूषकसम्बन्धि वेत्यर्थः । नरमहिषयोर्वा मनुष्यकासरयोर्वा । छागमपि छागसम्बन्धि वा । पललं मांसम् । बलिमुपहारम् । वितरतां ददतां मर्त्यवसतामपि मनुष्याणामपि । वितरतामपीत्यन्वयो **वा** । सतां साधकानाम् । अपूर्वाऽत्युत्तमा सर्वा सर्वप्रकारा सिद्धिरणिमादिरूपा । प्रतिपदमनुक्षणम् । प्रभवति प्रसरति । **केचित्** तु 'स्वैरं' यत्किञ्चिज्जातीयं सरोमास्थिपललं मांसमात्रं मार्जारसम्बध्यादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा बलिं वितरताम्'-इत्यन्वयेनार्थमाहुः। 'सतां सिद्धिः' इत्यत्र 'न किं सिद्धिः' इति पाठान्तरे किं न प्रभवति काक्वा प्रसरत्येवेत्यर्थः। काम्यादौ बलिदानस्यावश्यकत्वम्।

'नित्यानित्यः पशुबलिर्नित्यो नैमित्तिकार्चने।
काम्यं न नित्यवद्देवि नैमित्तिकवदुच्यते'॥

इत्यादि महाकालसंहिताकालीतन्त्रादौ नियमतत्त्वबोधनात्। तत्र सात्त्विकादिभेदः काम्यविशेषे बलिविशेषश्च विस्तरेण प्रतिपादितः।

तद्यथा।

'वानप्रस्थो ब्रह्मचारी गृहस्थो वा दयापरः।
सात्त्विको ब्रह्मनिष्ठश्च यश्च हिंसाविवर्जितः॥
ते न दद्युः पशुबलिमनुकल्पं ददत्यपि।
कूष्माण्डपनसालाबुकर्कटीबिल्वदाडिमाः॥
द्राक्षाखर्जूरलकुचरसालामलजम्बुकम्।
बलितुल्यानि चैतानि छागतुल्यानि तृप्तिषु'॥
इत्याद्यन्यत्र * निरूपितम्॥ १९॥

वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणकमलध्याननिरतः।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं
जपेल्लक्षं सम्यक् स्मरहरसमानः क्षितितले॥ २०॥

पुरश्चरणं विना प्रयोगासम्भवात् तद्धेतुपुश्चरणमाह

* अत्रत्यविशेषार्थं द्रष्टव्यं पुरश्चर्यार्णवस्य पृष्ठम् १०६३।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशीलक्षमिति । मातर्जगज्जननि । यो दिवा दिने वशी जितेन्द्रियस्तथा हविष्याशनरतो हविष्यभोजी तथा युष्मच्चरणकमलध्याननिरतो भवत्पादाब्जध्यानतत्परः सन् लक्षं तत्संख्याकं मनुम् । सम्यक् यथाविधि । इदमुत्तरवाक्येऽप्यन्वेति । प्रजपति । च पुनः । नक्तं रात्रौ नग्नो विवासा निधुवनविनोदेन सुरतोत्सवेन । उपलक्षणे तृतीया । युक्त इत्यर्थः । एतादृशः सन् । परं द्वितीयलक्षं सम्यक् जपेत् स साधकः क्षितितले पृथिव्यां स्मरहरसमानः शिवतुल्यो भवतीति शेषः । 'सम्यक्' इत्यत्र 'स स्यात्'-इति पाठान्तरे तु क्रिया स्पष्टैव ।

कालीतन्त्रेऽपि ।

'आदौ पुरस्क्रियां कुर्यान्नियमेन यथाविधि ।
लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ॥
रात्रौ ताम्बूलपूर्णास्यः शय्यायां लक्षमानतः ।
ततः सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा'-इत्यादि॥

काम्ये मालाया आवश्यकत्वमपि ।

तथा च कालीतन्त्रे ।

'नित्यं जपं करे कुर्यान्न प्रयोगे कदा चन ।
प्रयोगे विहिता माला तत्तत्कर्मानुरूपतः ॥
वश्ये पद्माक्षमाला स्याच्छान्तौ शङ्खमयी भवेत् ।
निम्बारिष्टात्मिका स्तम्भे द्वेषणे प्रेतदन्तजा ॥
अश्वदन्तोद्भवोच्चाटे मारणे खरदन्तजा ।
शतं वाऽथ तदर्धं वा सर्वसाधारणे जपे ॥
पञ्चाशद्भिः काम्यकर्मसिद्धिः स्याच्चतुरुत्तरैः ।
अष्टोत्तरशतैः सर्वसिद्धिरुक्ता मनीषिभिः'-इत्यादि ॥

३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवाजपकालो मुण्डमालायाम् ।

'प्रातः कालं समारभ्य जपेन्मध्यदिनावधि ।
प्रथमेऽहनि यज्जप्तं तज्जप्तव्यं दिने दिने' ॥

रात्रिजपकालोऽपि तत्रैव ।

'गते तु प्रथमे यामे तृतीयप्रहरावधि ।
निशायां तु प्रजप्तव्यं रात्रिशेषे जपेन्न च'इति ॥

एवं च प्रतिदिननियतसंख्याकत्वं हवनाद्यङ्गयुक्तत्वं च पुरश्चरणस्येत्याद्यन्यत्र*विस्तरेण निरूपितमित्यलम् ॥२०॥

इदं स्तोत्रं मातस्तव मनुसमुद्धारणमनु-
स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् ।
निशार्धे वा पूजा समयमधि वा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥२१॥

प्रकृतस्तवफलकथनं श्लोकद्वयेनाह इदम्-इति। मातर्जगज्जननि । तव मनुसमुद्धारणं तव मन्त्रोद्धारसाधनम्। तथा पदाम्बुजयुगलपूजाविधियुतं चरणकमलद्वन्द्वस्वपूजाविधिनाऽर्चनहोमबल्यादिविधिना युतं युक्तं तत्प्रतिपादकमित्यर्थः । अनुस्वरूपाख्यं त्वन्नामकं, स्वरूपमनुलक्षीकृत्यात्र प्रवृत्तत्वादिति भावः । इदं प्रकृतं स्तोत्रं निशार्धे वा मध्यरात्रौ वा रात्रिजपान्ते इति भावः । पूजासमयं पूजाकालमधि वा मध्ये वा कृते कृतमिति वा द्वितीयपूजाकाले इत्यर्थः । 'मनु वा'-इति पाठेऽनुलक्षीकृत्येत्यर्थः । 'पूजान्ते इत्यर्थम्'- एके । 'अथ वा' इति पाठान्तरे ऽत्यन्तसंयोगारोपादुद्देश्यादिपदाध्याहारेण

* द्रष्टव्यानि पुरश्चर्यार्णवस्य पृष्ठानि ४१३-६२९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वा योजनं ज्ञेयम् । यस्तु यो वा पठति तस्यापि इतरवद्-
पचारशून्यस्यापीत्यर्थः । कवित्वामृतरसो रम्यरचनारू-
पोऽमृतरसो यस्मिँस्तादृशः प्रलापः वाग्विलासः प्रसरति
प्रवर्तते ॥ २१ ॥

कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं
वशस्तस्य क्षोणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति परं केलिकलया
चिरं जीवन्मुक्तः स भवति च भक्तः प्रतिजनु ॥२२॥

कुरङ्गाक्षी-इति तं पाठतत्परम् । प्रेमतरलं प्रीतिच-
ञ्चलं क्रियाविशेषणं वा । कुरङ्गाक्षीवृन्दं मृगनेत्रोत्तमना-
यिकावृन्दम् । अनुसरति भोगादिसुखसाधनाय सन्नि-
धीभवति । तथा तस्य कुबेरप्रतिनिधिः कुबेरतुल्यः
क्षोणीपतिरपि राजाऽपि वशोऽधीनो भवतीत्यनुष-
ज्यते । 'कुबेरप्रतिनिधिरपि भवति'—इत्यन्वय इति
एके । तथा तस्य रिपुः शत्रुः कारागारं बन्धनालयम् ।
परमतिशयेन । यद्वा जीवनक्रियायामन्वयः । कलयति
समाश्रयति । च पुनः । स भक्तः केलिकलया क्रीडा-
शिल्पेन युक्त इत्यर्थः । प्रतिजनु प्रतिजन्म चिरं जीवन्
सन् मुक्तो भवति ।

'अनेकजन्मसंसिद्धस्ततो याति परां गतिम्'-इति ।
सिद्धान्तादिति भावः । कचित् तु 'परं चरमकाले
इत्यर्थः । मुक्तो भवतीत्यत्रान्वयः' इत्याहुः । एवं चेतराङ्ग-
तया पाठमात्रेणेतरोपचारशून्यस्य मुक्तिपर्यन्तफलभागित्व-
मिति स्वतन्त्रप्रयोगरूपेण पाठकर्तुः फलाधिक्यं न निर्वक्तुं
शक्यमिति भावः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्य पुरश्चरणादिकमुक्तं **महाकालसंहितादौ** ।

'कर्पूराख्यमिदं स्तोत्रं यदुक्तं भवता पुरा ।
षट्कर्मसाधनं तस्य प्रयोगं वद शङ्कर ॥

शिव उवाच ।

शृणु देवि प्रवक्ष्यामि कर्पूरस्तवसाधनम् ।
सकृत्कृतेऽपि देवेशी **कालो** तुष्टा भवेत् सदा ॥
शनिभौमदिने देवि स्नात्वा प्रयतमानसः ।
संपूज्य **कालिकां** देवीं संकल्पं सम्यगाचरेत् ॥
कृत्वा पीठादिकं न्यासं पठेत् स्तोत्रमनुत्तमम् ।
अयुतैकप्रमाणेन तद्दशांशं हुनेत् सुधीः ॥
तर्पणं त्वभिषेकं च ब्राह्मणान् भोजयेत् ततः ।
पश्चात् स्वकार्यसिद्ध्यर्थं प्रयोगानाचरेत् सुधीः ॥
प्रयोगमात्रे देवेशि अष्टोत्तरसहस्रकम् ।
यो जपेत् सर्वकार्यार्थं कामनाभेदभावितः ॥
आकर्षणे वशीकारे मारणोच्चाटने तथा ।
राज्ञां भये समुत्पन्ने दुर्भिक्षे प्राणसङ्कटे ॥
न्यासोत्पत्तौ महेशानि रोगशोकभये तथा ।
पठेत् स्तोत्रं **महाकाल्याः** सर्वशान्तिं प्रयच्छति ॥
कुमारीपूजनं चान्ते कर्त्तव्यं सुसमाहितैः ।
एवं कृते महेशानि सर्वसिद्धिर्भवेद्ध्रुवम्'–इति ॥

अत्र पुरश्चरणे विशेषानुक्तौ सामान्यमेवानुसन्धेयम् ।

तथा च रुद्रयामले ।

'सहस्रनामस्तोत्रेषु कवचेष्वपि पार्वति ।
तत्र तत्रोदिता या हि सा वै कार्या पुरस्क्रिया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्र नोक्ता पुरश्चर्या तत्रैव तु विधीयते ।
अयुतं तत् पुरश्चर्या स्तोत्रमात्रे प्रकीर्त्तिता ॥
स्तोत्रमध्ये स्थितं यद्यत् तत् सर्वं स्तोत्ररूपकम् ।
फलस्तुत्यादिकं देवि अङ्गमित्यभिधीयते ॥
आद्योपान्तं विना देवि फलमर्धं प्रकीर्त्तितम् ।
अत्रार्थे प्रत्ययो देवि षडङ्गाद्या यथा स्मृताः ॥
हवनं कवचादीनां श्लोकान्ते विहितं तथा ।
आद्योपान्तं पठित्वा वा पश्चात् तु हवनं मतम् ॥
अथ वा देवदेवेशि नामान्ते हवनं भवेत् ।
उपक्रमोपसंहारे श्लोकान्ते हवनं तथा ॥
आदौ पूर्णं तु संपठ्य तथैवान्ते महेश्वरि ।
मध्ये नामानि पाठ्यानि पुरश्चर्या यथा भवेत् ॥
तर्पणे चाभिषेके च कुर्यादेव महेश्वरि'-इति ।
स्तोत्रपाठे नियमास्तन्त्रान्तरे दर्शितास्तेऽपि नियताः ।

तथा च **विश्वसारे** ।

'ऋषिच्छन्दोदेवतादि न्यस्य स्तोत्रं पठेत् ततः ।
न्यासं विना कृते देवि भवेत् तुच्छफलं यतः ॥
इत्युक्तेरादौ तु न्यासः कर्त्तव्यः । अत्र ' **महाकाल** ऋषिर्गायत्री छन्दः श्री **दक्षिणकालिका** देवता हलो बीजानि स्वराः शक्तयोऽव्यक्तं कीलकं श्री**दक्षिणकालिका** देवता प्रसादसिद्धयर्थे तत्तत्कामनासिद्धये वा विनियोगः' **स्तोत्रलिङ्गात्** ।

ऋषिच्छन्दाद्यनुक्ते तु ऋषिः **शिव** इतीरितम् ।
गायत्री छन्द आदिष्टं हलो बीजानि पार्वति ॥
स्वराः शक्तय इत्युक्ता अव्ययं कीलकं मतम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुत्यदेवप्रसादादि काम्यार्थे विनियोजनम्' ॥

इति **शक्तिसङ्गमा**दिसिद्धान्ताच्च । ह्रीं बीजं हूँ शक्तिः क्रीं कीलकं वा ।

'ऋषिच्छन्द आदि यत्र कीर्त्तितं परमेश्वरि ।
तद्देवस्यात्र गदितमनुक्ते मूलदेववत्' ॥

इति **विश्वसारो**क्तेः । Q232.2316 .RAN 1986

न्यासस्थानानि **कालीतन्त्रे** ।

'ऋषिन्यासो मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे ।
देवता हृदये चैव बीजं तु गुह्यदेशके ।
शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं मतम्'-इति ।

वाराहीतन्त्रेऽपि ।

'आधारे स्थापयित्वा तु पुस्तकं वाचयेत् ततः ।
हस्तसंस्थापनाद्देवि भवेदर्धफलं यतः ॥
न स्वयं लिखितं स्तोत्रं नाब्राह्मणलिपिं पठेत् ।
पुस्तके वाचनं शस्तं सहस्रादधिकं यदि ॥
ततो न्यूनस्य तु भवेद्वाचनं पुस्तकं विना' ।

इत्याद्यन्यत्र विस्तरमिति शिवम् ॥ २२ ॥

ग्रन्थगौरवभीत्येयं कृता संक्षेपतो मया ।
तेनैव तुष्यतु चिरं देवेशी **कालिका** मयि ॥

इति श्रीमद्विद्वत्कुलमुकुटमणिनीराजतगिरिराजराजेन्द्र-पूजितपादपद्मश्रीपण्डितराजव्रजनाथसूरिसूनु-**रङ्गनाथ**विद्वन्निर्मिता कर्पूरस्तव-दीपिका समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सब प्रकार की पुस्तकें मिलने का पता—

बा० रघुवर सिंह बुकसेलर,

सरस्वती पुस्तकालय, मधुबनी, दरभंगा।

६९९० b

Nepal Sanskrit University, Balmeeki Campus, Kathmandu